શ્રીશુક ઉવાચ
ઇતિ ભૂમ્યાર્થિતો વાગ્ભિર્ભગવાન્ ભક્તિનમ્રયા ।
દત્ત્વાભયં ભૌમગૃહં પ્રાવિશત્સકલર્દ્ધિમત્ ॥ ૩૨॥

તત્ર રાજન્યકન્યાનાં ષટ્સહસ્રાધિકાયુતમ્ ।
ભૌમાહૃતાનાં વિક્રમ્ય રાજભ્યો દદૃશે હરિઃ ॥ ૩૩॥

તં પ્રવિષ્ટં સ્ત્રિયો વીક્ષ્ય નરવીરં વિમોહિતાઃ ।
મનસા વવ્રિરેઽભીષ્ટં પતિં દૈવોપસાદિતમ્ ॥ ૩૪॥

ભૂયાત્પતિરયં મહ્યં ધાતા તદનુમોદતામ્ ।
ઇતિ સર્વાઃ પૃથક્કૃષ્ણે ભાવેન હૃદયં દધુઃ ॥ ૩૫॥

તાઃ પ્રાહિણોદ્વારવતીં સુમૃષ્ટવિરજોઽમ્બરાઃ ।
નરયાનૈર્મહાકોશાન્ રથાશ્વાન્ દ્રવિણં મહત્ ॥ ૩૬॥

ઐરાવતકુલેભાંશ્ચ ચતુર્દન્તાંસ્તરસ્વિનઃ ।
પાણ્ડુરાંશ્ચ ચતુઃષષ્ટિં પ્રેષયામાસ કેશવઃ ॥ ૩૭॥

ગત્વા સુરેન્દ્રભવનં દત્ત્વાદિત્યૈ ચ કુણ્ડલે ।
પૂજિતસ્ત્રિદશેન્દ્રેણ સહેન્દ્રાણ્યા ચ સપ્રિયઃ ॥ ૩૮॥

ચોદિતો ભાર્યયોત્પાટ્ય પારીજાતં ગરુત્મતિ ।
આરોપ્ય સેન્દ્રાન્ વિબુધાન્ નિર્જિત્યોપાનયત્પુરમ્ ॥ ૩૯॥

સ્થાપિતઃ સત્યભામાયા ગૃહોદ્યાનોપશોભનઃ ।
અન્વગુર્ભ્રમરાઃ સ્વર્ગાત્તદ્ગન્ધાસવલમ્પટાઃ ॥ ૪૦॥

યયાચ આનમ્ય કિરીટકોટિભિઃ
પાદૌ સ્પૃશન્નચ્યુતમર્થસાધનમ્ ।
સિદ્ધાર્થ એતેન વિગૃહ્યતે મહા-
નહો સુરાણાં ચ તમો ધિગાઢ્યતામ્ ॥ ૪૧॥

અથો મુહૂર્ત એકસ્મિન્ નાનાગારેષુ તાઃ સ્ત્રિયઃ ।
યથોપયેમે ભગવાન્ તાવદ્રૂપધરોઽવ્યયઃ ॥ ૪૨॥

ગૃહેષુ તાસામનપાય્યતર્ક્યકૃ-
ન્નિરસ્તસામ્યાતિશયેષ્વવસ્થિતઃ ।
રેમે રમાભિર્નિજકામસમ્પ્લુતો

સ્રગ્વ્યેકકુણ્ડલો મત્તો વૈજયન્ત્યા ચ માલયા ।
બિભ્રત્સ્મિતમુખામ્ભોજં સ્વેદપ્રાલેયભૂષિતમ્ ॥ ૨૨॥

સ આજુહાવ યમુનાં જલક્રીડાર્થમીશ્વરઃ ।
નિજં વાક્યમનાદૃત્ય મત્ત ઇત્યાપગાં બલઃ ।
અનાગતાં હલાગ્રેણ કુપિતો વિચકર્ષ હ ॥ ૨૩॥

પાપે ત્વં મામવજ્ઞાય યન્નાયાસિ મયાઽઽહુતા ।
નેષ્યે ત્વાં લાઙ્ગલાગ્રેણ શતધા કામચારિણીમ્ ॥ ૨૪॥

એવં નિર્ભર્ત્સિતા ભીતા યમુના યદુનન્દનમ્ ।
ઉવાચ ચકિતા વાચં પતિતા પાદયોર્નૃપ ॥ ૨૫॥

રામ રામ મહાબાહો ન જાને તવ વિક્રમમ્ ।
યસ્યૈકાંશેન વિધૃતા જગતી જગતઃ પતે ॥ ૨૬॥

પરં ભાવં ભગવતો ભગવન્ મામજાનતીમ્ ।
મોક્તુમર્હસિ વિશ્વાત્મન્ પ્રપન્નાં ભક્તવત્સલ ॥ ૨૭॥

તતો વ્યમુઞ્ચદ્યમુનાં યાચિતો ભગવાન્ બલઃ ।
વિજગાહ જલં સ્ત્રીભિઃ કરેણુભિરિવેભરાટ્ ॥ ૨૮॥

કામં વિહૃત્ય સલિલાદુત્તીર્ણાયાસિતામ્બરે ।
ભૂષણાનિ મહાર્હાણિ દદૌ કાન્તિઃ શુભાં સ્રજમ્ ॥ ૨૯॥

વસિત્વા વાસસી નીલે માલામામુચ્ય કાઞ્ચનીમ્ ।
રેજે સ્વલઙ્કૃતો લિપ્તો માહેન્દ્ર ઇવ વારણઃ ॥ ૩૦॥

અદ્યાપિ દૃશ્યતે રાજન્ યમુનાઽઽકૃષ્ટવર્ત્મના ।
બલસ્યાનન્તવીર્યસ્ય વીર્યં સૂચયતીવ હિ ॥ ૩૧॥

એવં સર્વા નિશા યાતા એકેવ રમતો વ્રજે ।
રામસ્યાક્ષિપ્તચિત્તસ્ય માધુર્યૈર્વ્રજયોષિતામ્ ॥ ૩૨॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં દશમસ્કન્ધે ઉત્તરાર્ધે બલદેવવિજયે
યમુનાકર્ષણં નામ પઞ્ચષષ્ટિતમોઽધ્યાયઃ ॥ ૬૫॥

પત્નીસમ્યાજાવભૃથ્યૈશ્ચરિત્વા તે તમૃત્વિજઃ ।
આચાન્તં સ્નાપયાઞ્ચક્રુર્ગઙ્ગાયાં સહ કૃષ્ણયા ॥ ૧૯॥

દેવદુન્દુભયો નેદુર્નરદુન્દુભિભિઃ સમમ્ ।
મુમુચુઃ પુષ્પવર્ષાણિ દેવર્ષિપિતૃમાનવાઃ ॥ ૨૦॥

સસ્નુસ્તત્ર તતઃ સર્વે વર્ણાશ્રમયુતા નરાઃ ।
મહાપાતક્યપિ યતઃ સદ્યો મુચ્યેત કિલ્બિષાત્ ॥ ૨૧॥

અથ રાજાહતે ક્ષૌમે પરિધાય સ્વલઙ્કૃતઃ ।
ઋત્વિક્સદસ્યવિપ્રાદીનાનર્ચાભરણામ્બરૈઃ ॥ ૨૨॥

બન્ધૂઞ્જ્ઞાતિનૃપાન્ મિત્રસુહૃદોઽન્યાંશ્ચ સર્વશઃ ।
અભીક્ષ્ણં પૂજયામાસ નારાયણપરો નૃપઃ ॥ ૨૩॥

સર્વે જનાઃ સુરરુચો મણિકુણ્ડલસ્ર-
ગુષ્ણીષકઞ્ચુકદુકૂલમહાર્ઘ્યહારાઃ ।
નાર્યશ્ચ કુણ્ડલયુગાલકવૃન્દજુષ્ટ-
વક્ત્રશ્રિયઃ કનકમેખલયા વિરેજુઃ ॥ ૨૪॥

અથર્ત્વિજો મહાશીલાઃ સદસ્યા બ્રહ્મવાદિનઃ ।
બ્રહ્મક્ષત્રિયવિટ્ શૂદ્રા રાજાનો યે સમાગતાઃ ॥ ૨૫॥

દેવર્ષિપિતૃભૂતાનિ લોકપાલાઃ સહાનુગાઃ ।
પૂજિતાસ્તમનુજ્ઞાપ્ય સ્વધામાનિ યયુર્નૃપ ॥ ૨૬॥

હરિદાસસ્ય રાજર્ષે રાજસૂયમહોદયમ્ ।
નૈવાતૃપ્યન્ પ્રશંસન્તઃ પિબન્ મર્ત્યોઽમૃતં યથા ॥ ૨૭॥

તતો યુધિષ્ઠિરો રાજા સુહૃત્સમ્બન્ધિબાન્ધવાન્ ।
પ્રેમ્ણા નિવારયામાસ કૃષ્ણં ચ ત્યાગકાતરઃ ॥ ૨૮॥

ભગવાનપિ તત્રાઙ્ગ ન્યવાત્સીત્તત્પ્રિયઙ્કરઃ ।
પ્રસ્થાપ્ય યદુવીરાંશ્ચ સામ્બાદીંશ્ચ કુશસ્થલીમ્ ॥ ૨૯॥

ઇત્થં રાજા ધર્મસુતો મનોરથમહાર્ણવમ્ ।
સુદુસ્તરં સમુત્તીર્ય કૃષ્ણેનાસીદ્ગતજ્વરઃ ॥ ૩૦॥

એકદાન્તઃપુરે તસ્ય વીક્ષ્ય દુર્યોધનઃ શ્રિયમ્ ।
અતપ્યદ્રાજસૂયસ્ય મહિત્વં ચાચ્યુતાત્મનઃ ॥ ૩૧॥

## ॥ ૐ નમો ભગવતે વાસુદેવાય ॥

## ॥ ષટ્સપ્તતિતમોઽધ્યાયઃ - ૭૬ ॥

શ્રીશુક ઉવાચ
અથાન્યદપિ કૃષ્ણસ્ય શ‍ૃણુ કર્માદ્ભુતં નૃપ ।
ક્રીડાનરશરીરસ્ય યથા સૌભપતિર્હતઃ ॥ ૧॥

શિશુપાલસખઃ શાલ્વો રુક્મિણ્યુદ્વાહ આગતઃ ।
યદુભિર્નિર્જિતઃ સઙ્ખ્યે જરાસન્ધાદયસ્તથા ॥ ૨॥

શાલ્વઃ પ્રતિજ્ઞામકરોચ્છૃણ્વતાં સર્વભૂભુજામ્ ।
અયાદવીં ક્ષ્માં કરિષ્યે પૌરુષં મમ પશ્યત ॥ ૩॥

ઇતિ મૂઢઃ પ્રતિજ્ઞાય દેવં પશુપતિં પ્રભુમ્ ।
આરાધયામાસ નૃપઃ પાંસુમુષ્ટિં સકૃદ્ગ્રસન્ ॥ ૪॥

સંવત્સરાન્તે ભગવાનાશુતોષ ઉમાપતિઃ ।
વરેણ ચ્છન્દયામાસ શાલ્વં શરણમાગતમ્ ॥ ૫॥

દેવાસુરમનુષ્યાણાં ગન્ધર્વોરગરક્ષસામ્ ।
અભેદ્યં કામગં વવ્રે સ યાનં વૃષ્ણિભીષણમ્ ॥ ૬॥

તથેતિ ગિરિશાદિષ્ટો મયઃ પરપુરઞ્જયઃ ।
પુરં નિર્માય શાલ્વાય પ્રાદાત્સૌભમયસ્મયમ્ ॥ ૭॥

સ લબ્ધ્વા કામગં યાનં તમોધામ દુરાસદમ્ ।
યયૌ દ્વારવતીં શાલ્વો વૈરં વૃષ્ણિકૃતં સ્મરન્ ॥ ૮॥

નિરુધ્ય સેનયા શાલ્વો મહત્યા ભરતર્ષભ ।
પુરીં બભઞ્જોપવનાન્યુદ્યાનાનિ ચ સર્વશઃ ॥ ૯॥

સ ગોપુરાણિ દ્વારાણિ પ્રાસાદાટ્ટાલતોલિકાઃ ।
વિહારાન્ સ વિમાનાગ્ર્યાન્નિપેતુઃ શસ્ત્રવૃષ્ટયઃ ॥ ૧૦॥

શિલા દ્રુમાશ્ચાશનયઃ સર્પા આસારશર્કરાઃ ।
પ્રચણ્ડશ્ચક્રવાતોઽભૂદ્રજસાઽઽચ્છાદિતા દિશઃ ॥ ૧૧॥

એવં સૌહૃદશૈથિલ્યચિત્ત આનકદુન્દુભિઃ ।
રુરોદ તત્કૃતાં મૈત્રીં સ્મરન્નશ્રુવિલોચનઃ ॥ ૬૫॥

નન્દસ્તુ સખ્યુઃ પ્રિયકૃત્પ્રેમ્ણા ગોવિન્દરામયોઃ ।
અદ્ય શ્વ ઇતિ માસાંસ્ત્રીન્ યદુભિર્માનિતોઽવસત્ ॥ ૬૬॥

તતઃ કામૈઃ પૂર્યમાણઃ સવ્રજઃ સહબાન્ધવઃ ।
પરાર્ધ્યાભરણક્ષૌમનાનાનર્ઘ્યપરિચ્છદૈઃ ॥ ૬૭॥

વસુદેવોગ્રસેનાભ્યાં કૃષ્ણોદ્ધવબલાદિભિઃ ।
દત્તમાદાય પારિબર્હં યાપિતો યદુભિર્યયૌ ॥ ૬૮॥

નન્દો ગોપાશ્ચ ગોપ્યશ્ચ ગોવિન્દચરણામ્બુજે ।
મનઃ ક્ષિપ્તં પુનર્હર્તુમનીશા મથુરાં યયુઃ ॥ ૬૯॥

બન્ધુષુ પ્રતિયાતેષુ વૃષ્ણયઃ કૃષ્ણદેવતાઃ ।
વીક્ષ્ય પ્રાવૃષમાસન્નાં યયુર્દ્વારવતીં પુનઃ ॥ ૭૦॥

જનેભ્યઃ કથયાઞ્ચક્રુર્યદુદેવમહોત્સવમ્ ।
યદાસીત્તીર્થયાત્રાયાં સુહૃત્સન્દર્શનાદિકમ્ ॥ ૭૧॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં દશમસ્કન્ધે ઉત્તરાર્ધે તીર્થયાત્રા-
નુવર્ણનં નામ ચતુરશીતિતમોઽધ્યાયઃ ॥ ૮૪॥

## ॥ ૐ નમો ભગવતે વાસુદેવાય ॥

## ॥ પઞ્ચાશીતિતમોઽધ્યાયઃ - ૮૫ ॥

શ્રીબાદરાયણિરુવાચ
અથૈકદાઽઽત્મજૌ પ્રાપ્તૌ કૃતપાદાભિવન્દનૌ ।
વસુદેવોઽભિનન્દ્યાહ પ્રીત્યા સઙ્કર્ષણાચ્યુતૌ ॥ ૧॥

મુનીનાં સ વચઃ શ્રુત્વા પુત્રયોર્ધામસૂચકમ્ ।
તદ્વીર્યૈર્જાતવિશ્રમ્ભઃ પરિભાષ્યાભ્યભાષત ॥ ૨॥

કૃષ્ણ કૃષ્ણ મહાયોગિન્ સઙ્કર્ષણ સનાતન ।

